तथा इति......Having promised to do so they all went to the hermitage of Dadhicha.

तम् ऋषिम्......The gods bowed down to the sage and begged his bones.

ततः स..... Then that great man abandoned his life for the good of the three worlds.

तस्य परासोः......The gods took up the bones of him when he was dead and going to त्वष्टा their architect caused him to make a severe adamant of them.

ततः त्वष्टा......Then Tvashta told Indra 'take this and kill Vritra.'

इन्द्रेण सहिता......The gods in company with Indra approached Vritra who was standing occupying heaven and earth and who was protected by the Kaleyas, and they challenged them to fight.

तैः सह......A fierce fight took place between them and the gods. All the directions were covered over with dust. And the gods were much afraid of the demons.

इतः ततः......The gods could not bear the force of them running to and fro through their weakness and being afraid ran away.

तादृशान् तान्......Seeing them in that condition Indra submitted to Vishnu.

I submit to Rama=रामं शरणं गच्छामि.

I submit to Krishna कृष्णं शरणं व्रजामि.

ततः विष्णु......Then Vishnu imparted his lustre

to Indra and the gods and the great sages too did the same.

ततः रणधुराम्......Then Indra alone bore the yoke of the battle.

सः वृत्रस्य......He discharged his great adamant for killing Vritra. Being killed by it, Vritra lay on the ground.

कोट्या कोट्या......Each citygate was occupied by one crore of enemies.

तत् कर्म वालिपुत्रस्य......Seeing that act of the son of Vali, the universe was struck with wonder, all the Rakshasas were afraid and Rama was highly thought of (or Rama thought highly of it.)

सुग्रीवः मुमुदे......Sugriva rejoiced, gods said with wonder "well done." Bibhishana and monkeys sang praises.

राघवः न......Rama showed no mercy and no men could keep up courage ; the warriors died like moths and the people cried out "Alas, alas."

प्राणाः दध्वंसिरे......The beloved being killed, life perished and the body became stiff. That poor lady took a deep breath after a long time and wept and screamed.

लोहबन्धैः बबन्धे......Must my heart have been fastened with fetters of iron or must it have been made of adamant that it was not split asunder into a thousand parts without Rama ?

उत्तेरिथ समुद्रम्......You crossed the sea for my

sake, killed the enemies and died too ; fie upon me who am very wicked and who am disgraced by continuing to live.

मालिन्यम् मार्जयामास......The moon cleared off the dirtiness caused by darkness as a good man removes a stain falsely attributed to good persons by villains.

ऐन्द्रेण ह वै महाभिषेकेण......Samvarta, the descendant of Angirasa crowned Marutta, the son of Avikshita by the great Indra–coronation ceremony.

तस्मात् उ......Therefore Marutta the son of Avikshit went round the earth conquering it on all sides and performed a sacrifice with a holy horse.

तद् अपि......Thereupon this verse was sung.

मरुत: परिवेष्टार..... The gods lived in the house of Marutta as distributers of food " All the gods were the members of the assembly of the son of Avikshit whose desires were fulfilled. "

यदा कालेयानाम् सेनापतिः जघ्ने तदा ते साहसेन युयुधिरे किंतु देवाः तान् अन्ततः जिग्युः ।

ततः ते मन्त्रयांचक्रिरे विश्वम् च निषूदयितुम् निश्चिक्युः । तदर्थम् सर्वेषाम् ऋषीणाम् ब्राह्मणानाम् च वधः नाशः वा श्रेष्ठः उपायः अस्ति इति ते मेनिरे यतः यानि तपांसि ते तेपुः यान् यज्ञान् च ते तेनुः तानि विश्वम् अवललम्बे (or आशिश्राय).

Mark the use of तानि. तानि=तानि तपांसि तान् यज्ञान् च. तानि is a pronominal adjective. When the same pro-

nominal adjective qualifies two or more nouns of different genders, it becomes neuter when the nouns are Masculine or feminine and Neuter and masculine when the nouns are masculine and Feminine.

तस्मात् ते दिवा आत्मानम् समुद्रे प्रच्छादयांचक्रुः रात्रौ च बहिर् चेरुः बहून् ब्राह्मणान् जघ्नुः सर्वान् जनान् पीडयांचक्रुः (or आनर्दुः) च ।

वासिष्ठस्य भार्गवस्य अन्येषाम् ऋषीणाम् च आश्रमाः अवसादयांचक्रिरे निर्जनाः च चक्रिरे पश्चात् ते तान् देहुः ।

न के अपि जनाः ईजिरे देवाः च त्रेसुः ।

के इदम् सर्वम् चक्रुः इति ते न जज्ञुः तस्मात् च ते विष्णुम् उपजग्मुः तस्य साहाय्यम् ययाचिरे च ।

कालेयाः इदम् रात्रौ चक्रः दिवा च समद्रे आत्मानम् प्रच्छादयामासुः इति विष्णुः तान् कथयामास (or चचक्षे or चख्यौ)

अगस्त्यम् गच्छत समुद्रम् च पातुम् तम् प्रार्थयध्वम् इति सः तान् आदिदेश ।

देवाः ऋषिम् उपेयुः तम् प्रणेमुः तस्य प्रभावम् तुष्टुवुः च ।

सः तान् तेषाम् आगमनस्य प्रयोजनम् पप्रच्छ ।

ते तम् इदम् कथयांचक्रुः यस्मात् अगस्त्यः समुद्रम् ययौ देवाः च तम् अनुययुः (of अन्वीयुः) । सः समुद्रम् पपौ कालेयाः तेषाम् आश्रयस्थानात् आचकृषिरे च ।

तदा युद्धम् समापेदे देवाः तान् जघ्नुः च ।

Lesson 16th.

यदा महान्.........When the great grammarian Panini was born, some opinions of the eastern people were different from those of the western

people on the subject of grammar.

प्राचाम्=of the eastern people. प्रतीचाम्=of the western people.

पूर्वेषाम् संप्रदायम्......Having followed the custom of men of ancient time I pray to God in the beginning of the book.

विधवायाः पुनरुद्वाहः सशास्त्रः इति.........Some people say that the remarriage of a widow is in accordance with the Shastras. While there are others who maintain that it is prohibited in Kali yuga.

एके=some. एक is declined like a pronoun. See Rule 4 of Lesson 15th.

विवाहविधौ...In marriage ceremony they repeat mantras having referred to अर्यमन् the head of the pitris and पूषन् that is the sun.

अपराधं विना......A wife becomes angry with her husband without his fault.

प्रजापीडनजः वह्निः......The fire arising from the oppression of the subjects destroys the wealth, the family and the life of a king.

यस्मिन शकटे सोमः......To the yoke of the carriage in which the Soma plant is carried one ox should be yoked while the other should be kept unyoked and in this way people should carry the soma plant.

यूनां बुद्धिः......The intelligence of young men is refined by the Shastras.

पत्या परित्यक्ताः...That woman who being abandoned by her husband or on becoming a widow receives another husband becomes a widow remarried.

दिवि यथा......As there are innumerable stars in heaven, so there are innumerable virtue in Rama the son of Dasharatha.

तस्याः चार्वङ्ग्याः...The people seeing the loveliness of that woman having beautiful limbs got the fruit of their eyes.

इन्द्रियम् वा एतद् अस्मिन् लोके यद् दधि । यद् दध्ना अभिषिञ्चति इन्द्रियम् एव अस्मिन् तद् दधाति । Vigour of limbs or that which is called curdled milk in this world. As he infuses vigour itself by curdled milk, he passes it in him.

मधुराभिः......Govinda appeased the sage with sweet words. And that sage having favoured him with blessings went to his desired place.

अस्ना रक्षः संसृजतात्. Unite the demon with blood.

तात् is a weak termination optionally used to form the second and third pers. sing. of the imperative.

एकः शब्दः......It is the opinion of grammarians that a single word well learnt and properly used fulfils one's desire in heaven.

कामदुह् m. f. n. Decline it like दुह् m. f. n.

पुण्ये अहनि......The family priest crowned him on a holy day and repeated this mantra.

याभिः इन्द्रम्......I crown you with the same waters whith which Prajapati (the god Brahma) crowned Indra. King Soma, Varuna, Yama and Manu; may you be the supreme ruler of the kings in this world.

देवासुराः वै एषु...The gods and the demons fought in these worlds.

वै+एषु=वाय्+एषु=वा+एषु=वा एषु.

ते एतस्याम्......They fought in the eastern direction, there the demons conquered them.

ते दक्षिणस्याम्......They fought in the southern direction, there the demons conquered them.

ते प्रतिच्याम्...they fought in the western direction, there the demons conquered them.

ते उदीच्याम्......They fought in the northern direction, there the demons conquered them.

आदित्यचन्द्रौ अनिल अनलः च......The sun, the moon, the wind, the fire, the heaven, the earth, the water, the conscience, Yama, the day, the night, both the twilights and even Dharma, each of these knows the action of a man.

When two or more nominatives are joined by 'and' and each is considered separately, the verb is singular. Hence जानाति in this sentence is used in the singular number.

अवश्यं नश्वरे देहे......When the body is certainly perishable, and the enemy Yama the god of death is difficult to be controlled, it is a wonderful thing that laughter does not disappear from the face of men.

सत्यं संसृतिगर्ता...Truly this pit of the world is closely filled with miseries because nothing else (is obtained-) appears in this world without it.

तद् व्यतिरेकेण=with its exclusion, without it.

अनित्ये प्रियसंवासे...When the company of beloved persons is temporary in the ever revolving world, brother, mother, father and friend are companions on the way.

हृदि विद्धः इव......An intelligent man though afflicted should not speak that word by which a man is greatly pained as if pierced in the heart.

तस्य पृथ्वी..... His land produces wealth, wealth produces religious merit, religious merit brings him victory and victory bring forth prosperity.

(His land is of a superior quality, it is very fertile, so the productions bring him much wealth. By his wealth he performs many religious rites and acts of charity. By the religious merit he gets victory in all his undertakings and hence his shining prosperity.)

गर्हते न तथा श्वानम्......He does not hate a dog nor a chandala as he does a Kshatriya run away (in) from the battle field.

हते भर्तरि......The wives of his enemies lament through agony when their husbands are killed and their eyes become wet by tears flowing continuously.

हते भर्तरि Mark the use of the singular number. Here हते भर्तरि is equal to हतेषु भर्तृषु.

ददाति असौ..... He gives much wealth to Brahmanas daily and the Brahmanas being pleased always give him blessings.

असौ स्वप्नायमानः......He does not flatter his own merits even in a dream. Men only call them wonderful on the earth.

स्वप्नाय् First Fu. स्वप्नायिताहे.........Second Fu. स्वप्नायिष्ये......Con. अस्वप्नायिष्ये.

वृश्चिकानाम् भुजङ्गानाम्........The god Brahma has

certainly divided poison and put it in the tail of scorpions, in the mouth of serpents and in the heart of wicked persons.

चन्दनैः चर्चिता इव......When the moon is shining, the heaven appears as if it were besmeared with sandal powder, the directions appears as if they were adorned with kasha flowers and the earth appears as if it were washed with milk.

यथा आमिषम्......As flesh is eaten by fish in water, beasts of pray on the land and by birds in the sky, so a wealthy man is treated everywhere.

नक्रः स्वस्थानम्......A crocodile remaining in its own place (i. e. water) draws even a big elephant but the very same elephant when deprived of its place is defeated even by a dog.

बुद्धिमान् पुरुषः.........An intelligent man should abandon a teacher who does not teach and a priest who does not read the vedas like a boat that is broken in water.

स्वाध्यायः अध्येतव्यः=Perusal of sacred books should be kept up. This is the daily duty of every intelligent man wishing absolution. Therefore a priest should always go over the Vedas.

जाड्यं धियो हरति......Say " what good does the company of the virtuous not do to men."—It removes the dullness of the intellect, infuses truth in speech, points out a way to loftiness of respect, removes sin, purifies the mind and spreads fame in all directions.

मानुषाणां प्रमाणम्......The standard with men to constitute ownership is the possession of ten years while with birds and the lower animals the only time for which they occupy a certain place.

कृष्णसारे ददत्......Fixing my gaze upon the antelope and upon thee who hast thy bow strung I see as if Goda Shiva himself following a deer.

न अधर्मः चरितः......A wicked action practised in this world does not bear its fruit at once like a cow but turning back gradually it ruins the doer.

यदा भरतः अभिषिषिचे तदा सः ब्राह्मणेभ्यः शतशः गाः ददौ। दीर्घतमाः ताः ददतम् तम् ददर्श।

पूर्वस्मिन् काले ब्राह्मणाः गवाम् अजानाम् च आमिषम् आदुः। उदञ्चः जनाः दास्यम् मानवानर्हम् मेनिरे तद् उन्मूलयितुम् अवाग्भिः जनैः सह युयुधिरे च।

उशना असुराणाम् आचार्यः असीत् बृहस्पतिः देवानाम् च।

नीतिशास्त्रस्य ग्रन्थाः सन्ति येषाम् तौ कर्तृत्वेन अभिमतौ स्तः।

ते गिरिम् उत्खनितुम् आरभन्त बहुभिः अहोभिः तद् अकुर्वन् च।

त्वम् मम पृतनायै धान्यम् दास्यसि वा न वा इति सेनापतिना ग्रामणीः अपृच्छ्यत।

चित्रकूटस्य समीपस्थः उटजः संनिधौ वसद्भिः परिव्राड्भिः निरमीयत।

स्त्रियः बालानाम् पोषणम् कुर्युः पुमांसः महता श्रमेण धनम् उपार्जयेयुः च।

दिलीपस्य अश्वः एकदा वृत्रघ्ना जह्रे।

आदौ आपः एव आसन्। आसु अप्सु स्वयंभूः ब्रह्मा ददृशे तेन स्वयंभुवा एतानि सर्वाणि वस्तूनि ससृजिरे च।

सः अक्ष्णा अन्धः अस्ति ।

कुन्दलतायाः पुष्पेषु मधु मधुलिड्भिः अपीयत ।

मूर्तयः गजानाम् अस्थ्नाम् क्रियन्ते ।

यः ऋतस्य पथा चलति सः श्रियम् आप्नोति ।

ग्रीसदेशे (or युनानदेशे) गिरी आस्ताम् यौ शुनोः मस्तके इति अभ्यर्थीयेताम् ।

दीनेभ्यः द्रव्यम् दातुम् त्वम् तव पत्या आदिष्टा आसि ।

तस्य सख्यौ काशीम् गते सः अत्र एकाकी वसति ।

अर्यम्णः नाम झन्दधर्मग्रन्थेषु वर्तते ।

तेषाम् पुस्तकानाम् एकतमत् मह्यम् देहि ।

वेदान् पठन्तः ब्राह्मणाः वर्षासु आरटन्तः वर्षाभ्वः इव सन्ति ।

Lesson 17th.

पञ्चाशते ब्राह्मणेभ्यः......Krishnavarma gives food to fifty Brahmanas every day.

गुरोः परिचर्यां कुर्वतः......Forty—two days passed as he served his preceptor.

चतस्रः विद्याः.....Chandrapida learnt four lores and sixty—four arts.

The four lores are the following आन्वीक्षिकि logic or metaphysics. 2 त्रयी the three Vedas taken collectively. 3 वार्ता agriculture 4 दण्डनीति the science of politics.

There are sixty four arts 1 गीत, 2 वाद्य, 3 नृत्य, 4 लेख्य, 5 विशेषकच्छेद्य, 6 चित्रकर्म, 7 तण्डुलकुसुमबलिप्रकार, 8 पुस्पास्तरण, 9 दशनवसनांगराग, 10 मणिभूमिकाकर्म, 11 शयनरचन, 12 जलवाद्य, 13 उदकाघात, 14 चित्रयोग, 15 माल्यग्रथनविकल्प, 16 शेखरापीडयोजन, 17 नेपथ्यप्रयोग, 18 कर्णपत्रभंग, 19 सुगंधयुक्ति,

20 भूषणयोजन, 21 ऐन्द्रजाल, 22 रूपपरीक्षा, 23 चित्रशाकापूपभक्ष्यविकार, 24 कौचुमारयोग, 25 हस्तलाघव, 26 पानकरसरागयोजन 27 सूचिकर्म, 28 सूत्रक्रीडा, 29 प्रहेलिका, 30 प्रतिमाला, 31 दुर्वाचक्र, 32 प्रतिमाकरण, 33 पुस्तकवाचन, 34 नाटकाख्यायिकादर्शन, 35 काव्यसमस्यापूरण, 36 पट्टिकावेत्रवान–विकल्प, 37 तर्कुकर्म, 38 तक्षणकर्म, 39 वास्तुविद्या, 40 रूप्यरत्नपरीक्षा, 41 आकरज्ञान, 42 धातृवाद, 43 मणिरागज्ञान, 44 वृक्षायुर्वेदयोग, 45 मेषकुक्कुटलावकयुद्धविधि, 46 शुकसारिकाप्रलापन, 47 उत्सादनप्रसादन, 48 अक्षरमुष्टिकथन, 49 म्लेच्छितकविकल्प, 50 देशभाषाविज्ञान, 51 मानसचिन्ता, 52 अभिधानकोष, 53 छलितकयोग, 54 वस्तुगोपन, 55 द्युतविशेष, 56 बालक्रिडन, 57 वैनयिकी विद्या, 58 वैजयिकी विद्या, 59 व्यायामिकी विद्या, 60 आकर्षक्रीडा, 61 यंत्रमात्रका, 62 धारणामात्रका, 63 छंदोज्ञान, 64 केशसंमार्जनकौशल.

Vide the monthly magazine महाकाल of ज्येष्ठ संवत १९५६ published at Baroda for very clear definitions of these various arts.

तत्वारि शृङ्गा......It (i. e. the fire god) has four horns, three legs, two heads and seven hands.

श्रावणस्य कृष्णपक्षे...Devaki gave birth to Krishna on the eighth day of the dark half of the lunar month of Shravana.

त्रिः सप्तकृत्वः......Parashurama made the earth destitute of Kshatriyas twenty-one times.

त्रिः thrice, सप्तकृत्वः seven times. 3×7=21.

सप्तदश......One should repeat the samidheni verse seventeen times.

ताः एवाः......He (i. e. a sacrificial priest or the Hota) recites these verses seven times.

तासाम त्रिः...He recites the first of them thrice, the last of them thrice and thus they amount to eleven.

Seven verses.

First verse 3 times.
Second———1 time.
Third———1 ,,
Fourth———1 ,,
Fifth———1 ,,
Sixth———1 ,,
Seventh———3 times.

Thus 11 verses in all.

त्रयस्त्रिंशत् वै......There are thirty-three gods namely eight Vasus, eleven Rudras, twelve suns, the god Brahma and the deity Vashatkara.

शतम् अनूच्यम्......One hundred verses should be repeated for one wishing to live a long life.

शतायुः वै......A man lives for a hundred years therefore the Hota (puts him in) gives him that much life.

त्रीणि च शतानि च........Three hundred and sixty verses should be recited for one wishing to perform a sacrifice.

त्रीणि च वै......There are three hundred and sixty days in a year.

उप एनं यज्ञ......The Hota knowing that the sacrifice bows to him recites three hundred and sixty verses for him.

सप्त च शतानि......Seven hundred and twenty

verses should be repeated for one wishing for progeny and cattle.

सप्त च वै शतानि......There are seven hundred and twenty days and nights (in all) in a year.

संविभाजयति श्रीमान्......That prosperous king admits the best Brahmans to a share of his wealth and they also give him one-sixth part of their religious merit as a share.

गर्भाष्टमे अद्बे......The sacred thread ceremony of a Brahmana should be performed in the eighth year from conception, that of a Kshatriya in the eleventh from conception, while that of a Vaishya, in the twelfth year from conception.

त्रिः आचामेत् अपः......A man should first sip water thrice, then he should clean his face twice and then he should touch the cavities of his body, the (entire apparent part of the) body and the head with water आत्मानम्=the body. आत्मा देहे धृतौ जीवे स्वभावे परमात्मनि इति विश्वः

जीवन्तोऽपि मृताः पञ्च.........A poor man, a sick person, a fool, a traveller and a constant servant, these five are said by Vyas as dead though living.

अनारम्भः हि......Not beginning of works is the first sign of talent while going to the end of what is begun the second sign of talent.

नष्टे मृते......Another husband is enjoined for women under any of the five calamites viz. when her husband is lost, when dead, when turned a recluse, when impotent and when apostate.

तिस्रः कोट्यः......A woman, who follows husband in death, lives in heaven for so long a time as three crores and a half of periods which is also the number of hairs on a human body.

मासस्य सप्तविंशे दिने पण्डितानाम् सभा मिलिता।

तस्मिन् काले नवनवतिः जनाः परीक्षिताः येषाम् चतुः पञ्चाशत् निपुणा वैयाकरणाः उपलब्धाः

अष्टादश पुराणानि चतुर्विंशतिः स्मृतयः च सन्ति इति पण्डिताः वदन्ति।

आदौ त्रयः वेदाः बभूवुः ऋग्वेदः यजुर्वेदः सामवेदः च पश्चात् ते चत्वारः संपेदिरे।

अधुना यजुर्वेदस्य द्वे मुख्ये शाखे स्तः।

मनुस्मृतेः द्वादश अध्यायाः सन्ति तेषाम् सप्तमे राज्ञाम् धर्माः परिकीर्तिताः च।

आश्विनस्य शुक्लपक्षे दशम्याम् तिथौ दक्षिणवासिनः जनाः शमीवृक्षस्य पर्णानि सुवर्णम् अभिदधानाः परस्पराय (or परस्परं) ददति।

सर्वे शत्रवः पञ्चभिः पाण्डवैः हताः।

रामः रावणस्य दश शीर्षाणि चिच्छेद।

सः चतसृषु विद्यासु षट्सु शास्त्रेषु चतुष्षष्टौ कलासु च प्रावीण्यम् अलभत।

निवर्तस्व निवर्तस्व निवर्तस्व इति अहम् तम् त्रिः अकथयम् यदा च सः एवम् न अकरोत् तदा अहम् तम् लत्तया प्राहरम्।

अष्टानाम् भिन्नानाम् दिशाम् अष्टौ दिक्पालाः सन्ति इति भारतीयाः मन्यन्ते। Indian भारतीय, भारतदेशीय.

महाभारतस्य अष्टादशसु पर्वसु तृतीयम् श्रेष्ठम् अस्ति यतः तस्मिन् बहवः रम्याः कथाः सन्ति।

वैद्यः इदम् औषधम् द्विचत्वारिंशत् अहानि सेवितुम् (or ग्रहीतुम्) माम् आदिशत् ।

रघुवंशस्य सप्तदश सर्गान् कुमारसंभवस्य सप्त नव नाटकानि पतञ्जलेः महाभाष्यस्य षडशीतिं पत्राणि च अहम् अध्यैयि ।

Lesson 18th.

ऋग्वेदात्......The glory of Samaveda is greater than that of Rigveda.

भूयान् nom. sing. of भूयस्=greater. ऋग्वेदात् भूयान्-greater than Rigveda.

यज्ञवर्मा अयोध्याम् गच्छन् अध्वनः अर्धात् भूयः अतिक्रम्य अश्राम्यत् । Yagnavarma while going to Ayodhya having crossed more than half the way, got fatigued.

अध्वनः=of the way अर्धात् भूयः=more than half.

कृष्णस्य......Subhadra was the younger sister of Krishna.

सर्वेषु कुसुमेषु......Shirisha flower is the most delicate of all flowers.

निःश्रेयसाय......The way of the knowledge of God is better than the way of yoga practices for final beatitude.

श्रेष्ठः......While the way of the devotion to God is the best.

ज्ञानमार्ग=विचारप्रधानमार्ग. नित्यानित्यविवेक, वैराग्य, षट्संपत्ति etc.

कर्ममार्ग=क्रियाप्रधानमार्ग=अष्टांगयोग. यम, नियम, आसन, प्राणायाम etc.

भक्तिमार्ग=नवधाभक्ति. श्रवण, मनन, स्मरण, दर्शन, अर्चन etc. 10th प्रेमलक्षणा and 11th परा.

Vide सिद्धान्तसिन्धु pages 221 to 282 published by श्रेयःसाधकअधिकारिवर्ग for understanding these three मार्गs fully.

परमात्मा...The supreme spirit (i. e. God) is most minute than even an atom and greater than even a great thing.

धार्तराष्ट्रेभ्यः पाण्डवाः......The Pandavas were more powerful than the sons of Dhritarashtra on account of the help of Krishna but their army (i. e. the army of the sons of Dhritarashtra) was greater.

बलीयांसः nom. plu. of बलीयस् comp. from बलवत् or बलिन्.

गरीयान् nom. sing. of गरीयस् from गुरु.

दुःखितस्य वृत्तान्तश्रवणेन......The hearts of compassionate great men become wet (i. e. melt) by hearing of the account of an afflicted man.

न आर्द्राः अनार्द्राः अनार्द्राः, आर्द्राः संपद्यन्ते=आर्द्रीभवन्ति.

यः यज्ञकर्माणि......He, who performs secrificial duties according to sacred precepts gets progeny, cattle, lustre, the Brahmanical lustre (i. e the lustre of a ब्रह्मनिष्ठ महात्मा) and fame.

विष्णुशर्मणः Vishnusharma had fify-one sons.

तेषाम् ये मध्यमात्......Of them those twenty-five who were older than the middle Devadatta quarrelled with the younger twenty-five.

सर्वासु नदीषु......The Ganges is the longest and widest in extent of all the rivers.

Bhagiratha, the great grandson of Sagara

brought down, by practising the most austere penance, the celestial river Ganges from heaven to the earth and from earth to the lower regions to purify the ashes of his 60000 ancestors, the sons of Sagara. Hence the river Ganga is called the Bhagirathi.

तस्याः सलिलम्......Its water is purer than that of the Yamuna.

पर्वतेषु हिमालयः......Himalaya is the greatest of all the mountains.

अहो दीप्तिमतः......Oh, the capacity to inspire confidence (in others) of the body of this king though it possesses splendour.

ईदृशी मे......Such is my misfortune that not only do I suffer the separation from my husband but also from my two sons. भर्तुः and दारकयोः are in the gen case.

हा सौम्य हनूमन्......Oh, gentle Hanuman, where again is the possibility of a very benevolent sage like yourself in this world.

न एतद् विद्मः......We do not know which of the two is better for us (i. e. undertaking the war or adandoning it) and that we shall conquer them or they will conquer us.

The sentence न एतद् विद्म......is a quotation from the second chapter of Bhagvadgita.

न इयं मे जटा......A certain woman said. " This is not my matted hair but it is the collection of the hair formed into a braid."

न वेणिः अवेणिः, अवेणिः वेणिः संपद्यते तथा कृतः वेणीकृतः

दासीभूतां सर्पाणां जनन्याः......Garuda released his own mother, who had been a servant and who was doing the service of the mother of serpents, from slavery.

न दासी अदासी, अदासी दासी संपन्ना दासीभूता.

तपः चरन् रावणः......We hear that Ravana while performing religious austerity presented nine of his heads to Shiva.

न उपायनानि अनुपायनानि अनुपायनानि उपायनानि संपद्यन्ते, तानि चकार इति उपायनी चकार.

प्रियतमस्य पुण्डरीकस्य......Mahashveta afflicted with sorrow at the death of her most beloved Pundarika despised the worldly objects, abandoned her relations and be took herself to a residence in the forest.

न दूरः अदूरः, अदूरः दूरः संपद्यमानः कृतः दूरीकृतः.

एकः पुरुषः प्रियतमायाः......A certain man, wishing to enter the ground lying above the palace of his beloved, ascended it using the serpent that was hanging down from the window as a rope.

न रज्जुः अरज्जुः अरज्जुः रज्जुः संपद्यते, तां कृत्वा रज्जूकृत्य.

उपरते भर्तरि यत्......It is a folly that life is abandoned when the husband is dead.

उत्तरा विराटदुहिता.........Uttara the young daughter of a king named Virata did not give up her life even when Abhimanyu, who was modest, talented and courageous died.

पञ्चत्वम् गम्=To be resolved into the five elements of which the body consists, i. e. to die. The five elements are पृथ्वी, अप्, तेजस्, वायु and आकाश. आभि-

मन्यौ पञ्चत्वम् गते=Abhimanyu dying, when Abhimanyu died.

अन्याः अपि सहस्रशः.. ...It is heard that thousands of other girls also did not abandon their lives though they lost their husbands.

जीवनाय मनुजन्मनाम्......Perhaps that king is by the accession of good luck one like you who know the difference between good and bad men wandering here and there for livelihood.

कौसल्या दशरथस्य तिसृणाम् भार्याणाम् (or तिसृषु भार्यासु) ज्येष्ठा आसीत् कैकेयी च कनिष्ठा (or यविष्ठा) आसीत् ।

सीतायाः आकृतिः द्रौपद्याः तनीयसी आसीत् । than Drupadi's=द्रौपद्याः

Equal to the less:—equal=तुल्य, less=लघीयस्.

Words having the sense of ' equal to ' ' like, ' such as. तुल्य, सदृश, सम. संकाश etc. govern the Genitive or Instrumental of that with which any object in compared ; as कृष्णस्य तल्यः–सदृशः

It is equal to the less लघीयसा or लघीयसः तुल्यम्.

Equal to Krishna कृष्णेन or कृष्णस्य तुल्यः

Equal to Kubera कुबेरेण or कुबेरस्य समः

Equal to Rama रामेण or रामस्य तुल्यः

भूयः लघीयसा तुल्यम् इति अनुपपन्नम् ।

विद्रवणे अश्वः सर्वेषाम् प्राणिनाम् आशुतमः अस्ति ।

सद्गुणवन्तः सुखिनः भवन्ति आदरम् अर्हन्ति च ।

Dearer to Krishna कृष्णस्य प्रियतर.

Dearer to the father पितुः प्रियतर.

Dearer to the daughter दुहितुः प्रियतर.

Dearer to Rama रामस्य प्रियतर.

than सत्यभामा=सत्यभामायाः

than रमा=रमायाः

than लक्ष्मी=लक्ष्म्याः

रुक्मिणी कृष्णस्य सत्यभामायाः प्रियतरा आसीत् ।

यदा कस्यचित् दैवम् प्रतिकूलम् अस्ति तदा तस्य बन्धवः अपि विपक्षीभवन्ति.

न विपक्षाः अविपक्षाः, अविपक्षाः विपक्षाः संपद्यन्ते, विपक्षीभवन्ति.

यस्य वसु धैर्यम् यशः (or कीर्तिः) भूमिः वा अस्ति सः किम् अभिधीयते ।

सर्वे एकचित्तीभवेयुः इदम् जालम् च गृहीत्वा डयेरन् (or उड्डयेरन्)।

न एकचित्ताः अनेकचित्ताः अनेकचित्ताः एकचित्ताः संपद्येरन् इति एकचित्तीभवेयुः ।

इन्द्रः सर्वेषाम् देवानाम् ओजस्वितमः (or ओजिष्ठः) बलिष्ठः (बलितमः) च आसीत् तस्मात् ते तम् राज्ये अभिषिषिचुः च ।

ओजस्विन्+इष्ठ=ओजस्+विन्+इष्ठ=ओजस्+इष्ठ by 4th rule= ओज्+इष्ठ by 1st rule=ओजिष्ठ. बलिन्+इष्ठ=बल+इन्+इष्ठ=बल+इष्ठ by 4th rule=बल्+इष्ठ by 1st rule=बलिष्ठ.

मूलवाक्यस्य अर्थः टीकाकारेण विशदीक्रियते कदाचित् गूढीक्रियते च ।

न विशदः अविशदः, अविशदः विशदः संपद्यमानः क्रियते इति विशदीक्रियते गूढीक्रियते. is similarly dissolved.

दमयन्ती तस्याः कालस्य सर्वासाम् नारीणाम् चारुतमा (चारिष्ठा, सुन्दरतमा or सुन्दरिष्ठा) पत्यौ अनुरक्ततमा (or भक्ततमा) च आसीत् ।

तव हृदयम् अस्मिन् क्षणे प्रेम्णा द्रवीभूतम् अस्ति ।

ये वृषभाः शकटानाम् धूर्षु नियुक्ताः सन्ति ते साधारणेभ्यः पीवरतराः सन्ति ।

हे सीते त्वादृशी विशुद्धशीला सरला अनुरागिणी च अन्या स्त्री नास्ति मादृशः नृशंसः निर्घृणः च अन्यः जनः नास्ति ।

Lesson 19th.

प्रयागे......Uddalaka having lived at Prayaga for four days approached the way to Kashi.

रविवासरस्य......A certain man distressed by the burning charcoal in the form of worldly life cut off his own head in the last part of the night of Sunday.

रात्रेः चरमम्=चरमरात्रः षष्ठीः त०

आश्विनस्य......A great festival of the goddess Durga is celebrated in the first nine nights of the month of Ashvin

ननु प्रभाता......Certainly the night has disappeared, let me therefore leave my bed soon or what should I do though got up early; my hands and feet are not in clined to proceed with the things which are to be done at day break through sorrow.

अस्मिन्......How could this world have gone on if there had not been good persons as armours in this Kaliyuga terrific by the arrows of wicked speech discharged by rogues.

खलैः उत्सृष्टाः=खलोत्सृष्टाः Instr Tat.

दुष्टाःवाचः=दुष्टवाचः Karm.

खलोत्सृष्टाः दुष्टवाचः=खलोत्सृष्टदुष्टवाचः Karm.

ताः एव बाणाः Karm. तैः दारुणः=खलोत्सृष्टदुष्टवाग्बाणदारुणः तस्मिन्.

सन्तः जनाः=सज्जनाः Karm.

इज्या......Sacrifice, study of the Vedas, charity, penance, truthfulness, penitence, forgiveness and absence of greed; these eight practices are known as creating religious merit.

इज्याध्ययनदानानि द्वंद्व अष्टौ विधाः यस्य सः अष्टविधः of eight kinds.

रोग......Disease, sorrow, affliction, slavish state and difficulty, these are fruits of the trees of their own crimes of bodily beings.

रोग शोक.. नानि द्वंद्व. आत्मनः अपराधाः=आत्मापराधाः षष्ठीत० ते एव वृक्षाः Karm. तेषाम्.

सुखदुःखे......So having considered happiness and misery, gain and loss and victory and defeat to be equal prepare for the battle. Thus you will incur no sin.

धर्मार्थ.........The life of that person who has neither secured religious merit, nor wealth, nor fulfilment of desire nor absolution is useless like the nipple on the neck of a she-goat.

अजायाः गलः=अजागलः तस्मिन् स्तनः अजागलस्तनः तस्य.

निरर्थकम्. निर्गतः अर्थः यस्मात् तत् Bahu.

नाम=certainly. यद्......The act of following peason in death is certainly very fruitless

अविद्वज्जनाचरितः.........It is a course practised by illiterate persons, it is a wanton pastime through

infatuation, it is an act of ignorance, it is a deed of rashness, it is a weak judgment, it is a great indifference and it is a mistake resulting from folly that life is abandoned when one's father, brother, friend or husband is dead.

विद्वांसः जनाः विद्वज्जनाः कर्म. न विद्वज्जनाः अविद्वज्जनाः नञ् त॰ पु॰ तैः आचरितः अविद्वज्जनाचरितः तृ॰ त॰ पु॰

मोहात् विलसितम्=मोहविलसितम् प॰ त॰ पु॰

रभसात् आचरितम्=रभसाचरितम् प॰ त॰ पु॰

मौर्ख्येण स्खलितम्=मौर्ख्यस्खलितम् तृ॰ त॰ पु॰

स्वयं......If life does not come to an end of its own accord, it should not be abandoned.

अत्र......This matter being considered this abandonment of one's life is merely selfinterest on accouut of its being a remedy against the insufferable agony of sorrow.

स्वः अर्थः=स्वार्थः कर्म॰ प्राणानाम् परित्यागः=प्राणपरित्यागः ष॰त॰पु॰

न सह्यः असह्यः नञ त॰ पु॰

असह्यः शोकः कर्म. तस्य वेदना ष॰ त॰ पु॰

तस्याः प्रतिकारः ष॰ त॰ पु॰ तस्य भावः असह्य शोकवेदनाप्रतीकारत्वम् तस्मात.

उपरतस्य तु...It brings no advantage to the dead.

न तावत्..... This then is not a means to restore the dead person to life again, it is not a cause of gathering religious merits, it is not a means of acquiring a good world, it is not a remedy against falling into hell, it is not a means of seeing the dead man and it is not a cause of mutual union.

प्रत्युज्जीवनस्य उपायः=प्रत्युज्जीवनोपायः ष० त० पु०

शुभाः लोकाः कर्म. तेषाम् उपार्जनम् ष० त० पु० तस्य हेतुः

निरयेपातः निरयपातः स० त० पु० तस्य प्रतिकारः

परस्परः समागमः=परस्परसमागमः कर्म. तस्य निमित्तम ष० त० पु०

अन्याम् एव ......This dead man being helpless is carried altogether to another region got by the maturity of the fruits of his own actions while this man also (who dies after him) only incurs the sin of one who commits suicide.

स्वानि कर्माणि कर्म० तेषां फलानि ष० त० पु० तेषां परिपाक. ष० त० पु० तेन उपचिंता तृ० त० पु० ताम्.

न अस्ति वशं यस्य अवशः बहु.

गुरुः पञ्चदशाहे अष्टकृत्वः अस्मान् अध्यापयति ।

पञ्चदशानाम् अह्नाम् समाहारः पञ्चदशाहः तस्मिन्.

ऋत्विजः षडहे अग्निष्टोमं तन्वान्ति ।

रामस्य पराक्रमाणां यशः सप्तस्वर्गे सप्तपाताले च अगीयत ।

सप्तानां स्वर्गाणां समाहारः सप्तस्वर्गम् द्विगु. Similarly सप्तपातालम्.

ब्राह्मणक्षत्रियवैश्यशूद्राणां धर्माः मनुयाज्ञवल्क्यासितानां स्मृतिषु परिकीर्तिताः

मनुः च याज्ञवल्क्यः च असितः च मनुयाज्ञवल्क्यासिताः तेषाम्.

रामसुग्रीवौ परस्परसाहाय्याय सख्यं चक्रतुः ।

परस्परस्य साहाय्यम् तस्मै.

पूर्वसमुद्रगामिनीं महतीं सेनां वहन् रघुः शिवजटापातिताम् गङ्गाम् वहन् भगीरथः इव बभौ ।

पूर्वः समुद्रः कर्म० तम् गच्छति इति उप० त०

एवम् पूर्वान् देशान् आक्रामन् विजिगीषुः तालीवृक्षवनश्याममहोदधेः उपकण्ठम् प्राप ।

ताल्य एव वृक्षाः तालीवृक्षाः तेषां वनानि तैः श्यामः स महोदधिः कर्म० तस्य महान् उदधिः महोदधिः कर्म०

नौसाधनोद्धतान् वङ्गान् उन्मूल्य सः गङ्गास्रोतोऽन्तराले जयस्तम्भान् निचखान ।

नावः एव साधनानि नौसाधनानि कर्म० तैः उद्धताः नौसाधनोद्धताः तृ० त० पु० तान्.

गङ्गायाः स्रोतांसि ष० त० पु० तेषाम् अन्तरालम् ष० त० पु० तस्मिन्.

जयसूचकाः स्तम्भाः मध्यमदलोपी, तान्.

पक्षच्छेदोद्यतम् इन्द्रम् दृशाद्भिः पर्वताः इव कालिङ्ग राजः तम् अस्त्रैः प्रतिजग्राह ।

पक्षाणाम् छेदः पदच्छेदः तस्मै उद्यतः तम्.

विजिगीषुः गृहीतप्रतिमुक्तमहेन्द्रनाथस्य श्रियं जहार भूमिं तु न ।

महेन्द्रस्य नाथः महेन्द्रनाथः ष० त० पु० आदौ गृहीतः पश्चात् प्रतिमुक्तः गृहीतप्रतिमुक्तः कर्म० गृहीतप्रतिमुक्तः महेन्द्रनाथः गृहीतप्रतिमुक्तमहेन्द्रनाथः कर्म० तस्य.

परशुरामबाणदूरोत्सारितः अपि समुद्रः तस्य विशालया सेनया सह्याद्रिलग्न इव बभौ ।

परशुरामस्य बाणः ष० त० पु० तेन दूरोत्सारितः तृ० त० पु० सह्यम् लग्नः = द्वि० त० पु०.

Lesson 20th.

भार्यायाः......Nothing of whatever was desired

by the wife was unobtainable to that king whose bow was strung. न आसाद्यम्=अनासाद्यम्.

प्रतिदिनम्......I worship God Shiva every day according to the sacred precepts. I read books at my leisure and mutter prayers till noon, having taken a rosary of अक्ष beads.

दिने दिने इति प्रतिदिनम्.

त्रीणि अम्बकानि यस्य सः =त्र्यम्बकः Bahu तम्.

अवकाशम् यावत्=यावदवकाशम् अव्य.

अह्नः मध्यम्=मध्याह्नः ष. त. पु. तस्यः समयः ष. त. पु. मध्याह्न-समयात् आ=आमध्याह्नसमयम्, अव्य.

त्रिचतुराणि......I pray you should stay in this my house three or four days in the meanwhile I will fulfil the object of your desire.

आसन्नपञ्चाशाः गाः......Yajnavarma gave nearly fifty cows to the Brahmins on the first Monday of Shravana.

चिरप्रवृत्त एषः......This way of restoring the dead to life again has long been in practice; as for instance:—a boy sage named Ruru, the son of Pramati and the grandson of Bhargava gave half of his life to a girl named Pramadvara whose life was destroyed by a snake and who was born upon Menaka by Vishvavasu the king of the Gandharvas.

अर्जुनं च......A serpent virgin named Ulupi gave life to Arjuna who was following the horse of an Ashvamedha sacrifice and whose life was destroyed by an arrow in the front of the battle field by his son named Babhruvahana.

अश्वः मेध्यते अत्र इति अश्वमेधः बहु.

अश्वस्य मेधः an offering यत्र इति अश्वमेधः बहु.

अश्वस्य मेधः a sacrifice=अश्वमेध ष० त० पु०

अश्वमेधस्य तुरगः ष० त० पु० तम् अनुसरति उ० त० पु०

बभ्रुवाहनः नाम यस्य सः बभ्रुवाहननामा बहु. तेन समरस्य शिरः ष० त० पु० तस्मिन्.

शरेण अपहृताः प्राणाः यस्य सः तम् बहु.

उच्छ्वासेन सह with breath वर्तते इति सोच्छ्वासः तम् बहु.

अभिमन्युतनयं च......The divine Krishna whose mercy was aroused by the lamentation of Uttara gave unobtainable life to Parikshita the son of Abhimanyu who was burnt by the fire of the missile of Ashvatthaman and who was come out purely dead from the womb (of his mother).

अभिमन्योः तनयः=अभिमन्युतनयः ष० त० पु० तम्.

अश्वत्थाम्नः अस्त्रम् ष० त० पु० तस्य पावकः ष० त० पु० तेन परिप्लुष्टः तृ० त० पु० तम्.

उत्तरायाः प्रलापः ष० त० पु० तेन उपजनिता कृपा यस्य सः उत्तराप्रलापोपजनितकृपः बहु.

यानि एव सुरभिकुसुमधूपानुलेपनादीनि...Chandrapida being dead, having offered him a worship befitting a deity with the same fragrant flowers, incense, ointment etc which had been brought for the happiness of his company, as if the feeling of grief incarnate, afflicted, changed to another form at the very moment, pale faced as if dead, gazing at the feet of Chandrapida, checking the flow of tears though her heart was overcome by pain, experiencing the most painful state owing

to severe grief and the death, with the two feet of Chandrapida placed on her lap, hungry with the royal princess and her own attendants who had been exhausted on account of coming from a distance, who had taken no food, who had not bathed, drunk or eaten and whose spirits were exhausted, Kadambari spent that day.

कुसुमानि च धूपः च अनुलेपनम् च कुसुमधूपानुलेपनानिद्वंद्व सुरभीणि च कुसुमधूपा......नानि च=सुरभिकुसुमधूपानु लेपनानि कर्म. तानि आदौ येषां तानि सुरभि.......दीनि बहु.

देवतायाः उचिता=देवतोचिता ष० त० पु० ताम्.

शोकस्य वृत्ति=शोकवृत्तिः ष० त० पु०

आर्तम् रूपम् यस्याः सा=आर्तरूपा बहु.

अन्यद् रूपम्=रूपान्तरम् कर्म.

स एव क्षण: तत्क्षणः कर्म.

गतं जिवितं यस्याः सा गतजीविता बहु.

मुखम् अवलोकयते इति मुखावलोकिनी उप० त० पु.

पीडया उत्पीडितं हृदयं यस्याः सा पीडोत्पीडित हृदया बहु.

बाष्पाणां मोक्षः बाष्पमोक्षः ष० त० पु०

दामन् a rope दाम्नः from a rope उद्गता=उद्दामा प्रादि. उद्दामा वृतिः यस्य सः उद्दामवृतिः बहु. तस्मात्.

सामारोपितम् चन्द्रापीडचरणद्वयम् यया साः बहु.

दूरात आगमनम् ष० त० पु० तेन खिन्नः तृ० त० पु.

स्नानं च पानं च भोजनं च स्नानपानभोजनानि न प्रतिपन्नानि स्नानपान...नानि येनसः बहु.

मुक्तः आत्मा येन सः मुक्तात्मा बहु० तेन.

राजपुत्राणां लोकः ष० त० पु० तेन.

स्वः परिजनः कर्म.

निर्गतः आहारः यस्याः सा निराहारा बहु.

सज्जन्ति कुञ्जरघटाः......Troops of elephants get ready when he is about to march, the goddess of victory always embraces him in battle and his mind becomes attached to the assembly of learned men whose hearts are purified by learning owing to his fondness for merits.

तस्य प्रयाणम्=तत्प्रयाणम् ष० त० पु० तस्मिन्.

जयस्य श्रीः=जयश्रीः ष० त० पु०

गुणेषु अनुरागः=गुणानुरागः स० त० पु.

विद्यया विशुद्धं हृदयं यस्य सः विद्याविशुद्धहृदयः बहु० तस्मिन्.

यं न स्पृशन्ति एनम्......The same great god Shiva whose real nature is inconceivable, whose lustre is infinite, whose forms are endless and whom the power of the mind and the speech of living beings do not reach (i. e. comprehend) is fit to be worshipped by us.

न चिन्त्यम्=अचिन्त्यम् नञ० त० पु० अचिन्त्यं तत्त्वं यस्य सः अचिन्त्यतत्त्वः बहु. तम्.

दुरन्तं धाम यस्य सः दुरन्तधामा बहु. तम्.

न अन्तः येषां तानि अनन्तानि बहु. अनन्तानि रूपाणि यस्य सः अनन्तरूपः बहु. तम्.

मनश्च वचश्च मनोवचसी द्वंद्व. तयोः वृत्तयः ष. त. पु.

आत्मानं भजन्ते इति आत्मभाजः उप. त. तेषाम्.

अयं निजः परः वा......It is the consideration of narrow-minded man that this is my own relation or this belongs to an other party, but to those whose deeds are noble the earth itself is one family.

लघु चेतः येषां ते लघुचेतसः बहु. तेषाम्.

उदाराणि चरितानि येषां ते उदारचरिताः बहु तेषाम्.

वसु दधाति इति वसुधा उप० त० पु.

दंष्ट्राभङ्गं मृगाणाम्...Oh best among men, universal emperors like yourself whose self respect and pride are manifest do not tolerate the veolation of their commands just as lords of beasts i. e. lions do not bear the breaking of their jaws.

दंष्ट्राणां भङ्गः ष० त० पु.

मानः च अवलेपः च मानावलेपौ द्वंद्व व्यक्तौ मानावलेपौ येषां ते व्यक्तमानावलेपाः बहु.

नृषुवरः=नृवरः स० त० पु० तत्संबुद्धौ हे नृवर.

नृणां पतयः=नृपतयः ष० त० पु.

अहम् पञ्चषान् जनान् अधिकपञ्चपञ्चाशाः गाः आसन्नषष्टान् शुनः च मार्गे अपश्यम् ।

पञ्च वा षड् वा=पञ्चषाः बहु० तान्.

पञ्चपञ्चाशतः अधिकाः=अधिकपञ्चपञ्चाशाः बहु ताः

षष्टेः आसन्नाः=आसन्नषष्टाः बहु० तान्.

अयम् सुराङ्गनाप्रार्थितानुरागः अङ्गराजः अस्ति.

सुराणाम् अङ्गनाः=सुराङ्गनाः ष० त० पु० ताभिः प्रार्थितः अनुरागः यस्य सः सुराङ्गना......नुरागः बहु.

अङ्गानाम् राजा=अङ्गराजः ष० त० पु०

निसर्गभिन्नास्पदे श्रीः सरस्वती च देव्यौ अस्मिन् एकत्र निवसतः ।

निसर्गेण भिन्ने आस्पदे गयोः ते निसर्गभिन्नास्पदे बहु.

श्रुतमहाश्वेतावृत्तान्तः शोकाकुलः नृपतिः एकम् अपि शब्दं यक्तुं न शशाक ।

महाश्वेतायाः वृत्तान्तः=महाश्वेतावृत्तान्तः ष० त० पु० श्रुतमहाश्वे-वृत्तान्तः बहु.

शोकेन आकुलः=शोकाकुलः तृ० त० पु०

अयम् अगाधसत्त्वः प्रजानुरञ्जनलब्धमहायशाः परंतपनामा राजा अस्ति ।

न गाधम्=अगाधम्. अगाधम् सत्त्वम् यस्य सः अगाधसत्त्वः बहु.

प्रजायाः अनुरञ्जनम् ष० त० पु महत् च तत् यशः च=महाशयः कर्म० प्रजानुरञ्जनेन लब्धम् यहाशयः येन सः प्रजानुरञ्जनलब्धमहा-यशाः बहु.

परंतपः नाम यस्य सः परंतपनामा बहु.

अहम् अधुना यथाशक्ति न्यायस्य तत्त्वानि व्याचक्षे ।

शलभाः अभ्यग्नि डयन्ते । अग्निम् अभि=अभ्यग्नि, अव्य० रघुः प्रतिपर्वतम् जयस्तम्भम् निचखान ।

पर्वते पर्वते इति प्रतिपर्वतम्, अव्य. जयसूचकः स्तम्भः=जयस्तम्भः मध्यमपदलोपी.

जनस्थानम् अनुगोदावरि स्थितम् अस्ति ।

गोदावरीम् अन्वायतम्=अनुगोदावरि अव्य.

कुमारीम् भर्तुः गृहम् प्रहित्य प्रत्यर्पितन्यासः इव भूत्वा च अहम् अधुना सुखी भूतः (or स्वस्थः जातः) ।

प्रत्यर्पितः न्यासः येन सः प्रत्यर्पितन्यासः बहु.

स्वे तिष्ठति इति स्वस्थः स० त० पु०

अयम् दीर्घबाहुः विशालवक्षाः तनुमध्यः च अवन्तीनाथः अस्ति ।

दीर्घौ बाहू यस्य सः बहु० विशालं वक्षः यस्य सः बहु० तनु मध्यम् यस्य सः बहु.

कमलाक्षी तन्वङ्गी च कुमारी तस्मिन् तस्याः भावम् न बबन्ध ।

तनूनि अङ्गानि यस्याः सा तन्वङ्गी बहु.

अङ्गदभूषितबाहुः महेन्द्रपर्वतसमानसारः प्रभावनाशितशत्रुः च कलिङ्गनाथः हेमाङ्गदः यत्र निषण्णः आसीत् तत्र यदा सा चन्द्रमुखी कुमारी उपजगाम तदा सुनन्दा ताम् अभाषत ।

अङ्गदैः भूषितः बाहुः यस्य सः बहु० महेन्द्रपर्वतेन समानः सारः यस्य सः बहु० प्रभावेण नाशिताः शत्रवः येन सः बहु.

कलिङ्गानाम् नाथः ष० त० पु० चन्द्रः इव मुखम् यस्याः सा बहु.

Compounds named and dissolved.

Lesson 13th.

दिव्याश्रमपदम्	दिव्यः आश्रमः कर्म. तस्य पदम् ष. त. पु.
स्वागतम्	सुष्ठु आगतम् उप. त पु.
चारुसर्वाङ्गीम्	सर्वाणि अङ्गानि=सर्वाङ्गानि कर्म. चारूणि सर्वाङ्गानि यस्याः सा बहु. ताम्.
ससैनिकः	सैनिकैः सह वर्तते इति बहु.
सजीवा	जीवेन सह वर्तते इति बहु.

Lesson 14th.

स्वर्गलोकम्	ष. त. पु. वालिपुत्रः and लोहबन्धाः also ष. त. पु.

सेन्द्राः	इन्द्रेण सह वर्तन्ते इति बहु.
सविस्मयाः	विस्मयेण सह वर्तन्ते इति बहु.
महात्मा	महान् आत्मा यस्य सः बहु.
परासोः	परागताः असवः यस्य सः परासुः बहु. तस्य.
रणधुराम्	रणस्य धूः ष. त. पु. ताम्.
पुरद्वारम्	पुरस्य द्वाः ष.: त.: पु.
जीवितलघूकृताम्	जीवितेन लघूकृता तृ. त. पु. ताम्.
सत्पुरुषः	सन् च असौ पुरुषः च कर्म.
महाभिषेकेण	महाश्चासौ अभिषेकश्च कर्म तेन.
कामप्रेः	This is a वैदिक form.

Lesson 15th.

हिमाचलः	न चलः अचलः नञ् त० पु.
	हिमस्य अचलः ष० त० पु.
हितकरम्	हितं करोति इति उप० त० पु
मूषकराजः	मूषकाणां राजा इति ष० त० पु.
बाणपथम्	बाणस्य पन्थाः ष० त० पु०
असंशयम्	न संशयः यथा स्यात् तथा अव्य.
सुवृष्टिः	शोभना वृष्टिः प्रादि.
दुःखभाक्	दुःखम् भजति इति उप० त० पु.
बहुविधैः	बहवः विधाः येषां तानि बहु.
अनागाः	नास्ति अगः a fault यस्य सः बहु.
अनर्हः	न अर्हः नञ् त० पु.
जनाधिपः	जनानाम् अधिपः ष० त० पु.
	अधिकं पाति इति अधिपः उप० त० पु.
महावीरः	महांश्चासौ वीरश्च कर्म. तत्संबुद्धौ.

ब्रह्मर्षिभ्यः	ब्राह्मणश्च ते ऋषयश्चब्रह्मर्षयः कर्म तेभ्यः
मत्प्रसादात्	मम प्रसादः ष० त० पु. तस्मात्.
विषनिमित्ता	विषम् निमित्तम् यस्याः सा बहु.
राजेन्द्र	राजा इन्द्र इव कर्म.
अक्षनैपुणः	अक्षेषु नैपुणम् यस्य सः बहु.
दशग्रीवस्य	दश ग्रीवाः यस्य सः बहु.
मधुकर	मधु करोति इति उपः त० पु.
मदिराक्ष्याः	मदिरा इव अक्षिणी यस्याः सा मदिराक्षी बहु. तस्या
वरतनुः	वरा तनुः यस्याः सा बहु.
कुलजः	कुले जातः स० त० पु.

नराधिप, निषधेश्वर, अक्षहृदयम्, अश्वहृदयेन, इक्ष्वाकुकुलजः, अक्षज्ञः वासोयुगम्, तन्मुखोच्छ्वासगन्धम् and तत्परिपन्थिनी are genitive Tatpurusha compounds.

Lesson 16th.

शास्त्रविरुद्धः	शास्त्रेण विरुद्धः तृ० त० पु.
प्रजापीडनजः	प्रजायाः पीडनम् ष० त० पु० तस्मिन् जातः स० त० पु.
विधवा	विगतः धवः a husband यस्याः सा बहु.
संख्यातीताः	संख्याम् अतीताः द्वि० त० पु.
चार्वङ्ग्याः	चारूणि अङ्गानि यस्याः सा चार्वङ्गी बहु.
कामधुग्	कामान् दोग्धि इति उप० त० पु.
आदित्यचन्द्रौ	द्वंद्व.
संसृतिगर्ता	संसृतिः गर्ता इव कर्म.
चक्रवद्गतौ	चक्रवद् गतिः यस्य सः बहु तस्मिन्.

अधिज्यकार्मुके	अधिज्यं कार्मुकं यस्य सः बहु.
मृगानुसारिणम्	मृगम् अनुसरति इति उप० त० पु० तम्.
ग्रामणीः	ग्रामं नयति इति उप० त पु.
वृत्रघ्ना	वृत्रं हन्ति इति वृत्रहा उप० त० पु.
मधुलिड्भिः	मधु लिहन्ति इति उप० त० पु० तैः

Lesson 17th.

द्विचत्वारिंशत्	द्वाभ्याम् अधिका चत्वारिंशत् मध्यमपदलोपी.
चतुष्षष्टिम्	चतसृभिः अधिका षष्टिः मध्य. ताम्.

त्रयस्त्रिंशत्, नवनवति, अष्टादश, चतुश्चत्वारिंशत्, द्वादश, द्विचत्वारिंशत्, सप्तदश, षडशीतिम् are all मध्यम पदलोपी compounds and they should be similarly dissolved.

कृष्णपक्षे	कृष्णश्चासौ पक्षश्च कर्म. तस्मिन्.
अक्षत्रियाम्	न विद्यन्ते क्षत्रियाः यस्याम् सा बहु. ताम्.
द्विजोत्तमान्	द्विजेषु उत्तमाः स. पु. तान्.
धर्मषष्ठांशभागेन	षष्ठः अंशः=षष्ठांशः कर्म. धर्मस्य षष्ठांशः धर्मषष्ठांशः ष० त० पु० सएवभागः कर्म. तेन.
गर्भाष्टमे	गर्भात् अष्टमः प० त० पु० तस्मिन्.
नित्यसेवकः	नित्यः सेवकः कर्म.
अनारम्भः	न आरम्भः नञ् त० पु.
बुद्धिलक्षणम्	बुद्धेः लक्षणम् ष० त० पु.
अर्धकोटी	अर्धा कोटी कर्म.